# Himadri Vaibhavam Badrinatha

# हिमाद्रिवैभवं बद्रीनाथः

## Document Information

Text title : Himadri Vaibhavam Badrinatha

File name : himAdrivaibhavaMbadrInAthaH.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : Kapiladeva Dwivedi

Proofread by : Mandar Mali

Translated by : Mandar Mali

Description/comments : Rashtragitanjali, Kapiladeva Dwivedi (Ed.)

Acknowledge-Permission: Kapiladeva Dwivedi, Vishvabharati Anusandhan Parishad, Varanasi

Latest update : May 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

Himadri Vaibhavam Badrinatha

# हिमाद्रिवैभवं बद्रीनाथः

(क० श्रीबद्रीनाथः)
(गीतिका) (मात्रासमक जाति)
जय जय जय हैमाद्रि-सुकीर्ते !
जय हे भारत-गौरव ! जय हे !
हैम-मुकुट धृत-मञ्जुल-मूर्ते !
रुचिर-हिमानी-संश्रित-भूते ॥ जय० ॥

नील-कण्ठ-शिखराञ्चित-भूतिः
नर-नारायण गिरि-कृत-कान्तिः ।
देवालय-सुषमा-श्रित-कीर्तिः
ऋषि मुनि-बुध-जन-गीत-सुकीर्तिः ॥ जय० ॥

ज्ञान-ज्योत्स्ना-हृत-कलि-पापं
शान्ति-सुधा-प्रशमित भव-तापम् ।
दिव्य-चेतनोत्साह-प्रतापं
आध्यात्मिक-शुभ शक्ति-प्रपातम् ॥ जय० ॥

तप्त-कुण्ड–जल-गौरव-पूर्णं
तप्त-वारि-हृत-दैहिक-तापम् ।
अलकनन्द-जल-पावित-भूमिः,
देवभूमिरयममृत-सूतिः ॥ जय० ॥

हिम-द्रोणि जल-पात-सुरम्यं
सुरुचि-स्त्रोतसा कल-रव-हृद्यम् ।
हिम-वृष्ट्याऽऽहृत-मानस तुष्टिः,
हैम प्रभा-गरिमाऽञ्चित-सृष्टिः ॥ जय० ॥

माणा-नीति-दरी-धृत-शक्तिः
शत्रु-संहृति गौरव-गीति ।

वसुधारा सुप्रपात-सुशोभं,
हिममय गिरिगण-गौरव-गण्यः ॥ जय० ॥

अलकनन्द-सरितो जनि-भूमिः,
बदरी-फल-भर-भूषित-भूमिः ।
द्रुपदा पुष्ट्या अनुमित शक्तिः
शक्ति-भक्ति-गरिमाञ्चित-सिद्धिः ॥ जय० ॥

सतत-पूत जल-स्रोतो-रम्यं
सुरभि-समीरण-प्रतिपल हृद्यः ।
शाप-पाप-भवताप विहीनः
आधि व्याधि-सञ्चार विहीनः ॥ जय० ॥

बद्रीनाथः ऋषि-मुनि-नाथः
सुकृत-कर्मणा प्रतिपल-सार्थः ।
शान्ते स्थान जागृति-धामः,
विश्व शान्ति-परिपूरित-कामः ॥ जय० ॥

काष्ठ-पुष्प-फल-तरुतति-रम्यम्
हिममय-हिमतति-सततं-हृद्य ।
भारत-त्राता भारत-भूतिः
जयति हिमाद्रि गौरव-मूर्तिः ॥ जय० ॥

Proofread by Mandar Mali

*Himadri Vaibhavam Badrinatha*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*